११० त्वेपि नाभिमतसिद्धिर्विशिष्टपक्षतावच्छेदकाप्रसिद्ध्यात थाऽऽह सिद्धिरूपत्यादादित्याह॰ तद्वित्ये विशिष्टपक्षग्रहाविरोधित्वघटितत्रपरूपासिद्धिल
110 क्षणाद्यापत्तेः॰ धूमाभाववत्ह्रदस्यान्यविशिष्टपक्षग्रहाविरोधित्वं अत्रैव प्रकृते ति शुक्तौ प्रवर्त्तकरजतज्ञानस्य पक्षत्वाद्रजतज्ञाने शु-
क्तौ प्रवर्त्तत्वाभावज्ञानस्य विशिष्टपक्षग्रह विरोधित्वादिति ॰ न तु ज्ञायमानेष्टभेदाग्रहो ऽगृहीतभेदकमिष्टज्ञानं चेह तु विनिगमनविर
हादिति॰ मूलोक्तमनुक्तमित्यत्र इदं चेति भेदेनि तथा च समूहालंबनसाधारणशक्तिविषयत्वसिद्धावपिनान्यथाख्यातिसिद्धिरिति भा
साह याकार्य्यरंगे रजताभेदावगाहिज्ञानरूपं कार्य्यं शुक्तिरजतेत्यादिसमूहालंबनरजतज्ञानविषयत्वावच्छिन्नशुक्तेः सिद्धसाधनं स्या
दतोऽन्यथासाध्यार्थमाह रजतत्वप्रकारिकेति रजतार्थिनः शुरूपस्य शुक्त्याद्यर्थितज्ज्यारजतधर्माविषयशुक्त्यादौ कदाचित्प्रवृत्तिः सं
भवतीति व्यभिचारः स्यादतो हितत्वथमाह॰ रजतार्थिनेति घटरजतार्थितोत्तज्जन्यायारजतघटोभयप्रवृत्तिः तद्विषये घटे रजतधर्माविषये व्य राम
भिचारादाह रजतत्वप्रकारेति लाघवाद्दाह ॰ रजतत्वप्रकारिकेतीति कश्चित् अत्र शुरूषविशेषीयरजतत्वप्रकारकज्ञानविषयताश्रय ११०

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्वंसाध्यंतेनसर्वंरजतमितिभ्रमविषयतायाः सर्वत्र सत्वाद्विषयत्वादित्यस्यैवगमकत्वे हेतौ नविशेषणवैयर्थ्यं ॰ अत्र साध्ये ज्ञानांशस्य प्रवेशात्र
सिद्धसाधनंरजतार्थिन॰ शुक्तिरूपस्य शुक्तित्वप्रकारिकापि प्रवृत्तिः कदाचित्प्रवृत्तिः संभवति नत्र बाधादाह शुक्तितिष्ठेति प्रवृत्तिधर्मिप
द्यात्मा विवक्षितस्तदा तद्धर्मिके नात्मवृत्तिकेनारजतस्मरणेनयदि प्रवृत्तिविशेष्य स्तदा शुक्तिरजतेतिसमूहालंबनेनैवं न शुक्तिस्मरणे
नार्थान्तरमतः स्वविषयवृत्तीति समूहालंबनस्मरणस्य रजतत्वप्रकारकविषयता न शुक्तिवृत्तिरितिनार्थान्तरं स्वदेशप्रवृत्ति रजता
र्थिन कदाचित्रकशुक्तिप्रवृत्तौ व्यभिचारात् आह रजतेच्छेति रजतेच्छा रजतप्रकारिकेच्छा तत्वेनजन्यतावाध्यास्यात्व गर्भे साध्ये कृतेना
र्थान्तरमुक्तमतस्तद्विजमाह स्वपदेति रजतस्मरणविषयतायाः स्वविषयशुक्तिस्वरूपत्वेन स्वविषयवृत्तीत्यनेनपरिष्कृतात्वमानेना
र्थान्तरे किंतु सत्वानुगमदोषशंकिस्तुचितं ॰ ईश्वरीयत्नेच व्यभिचारादाह ॰ इच्छाजन्येति ॰ यद्यपि घटेच्छायत्न यो विशेषहेतुता यात्र
वश्यवाच्यत्वाद्विजातीययत्नत्वेनरायत्वेन कार्यकारणभावे मानाभावानान्न यत्नवृत्तिजातिविशेषसिद्धिस्तथापि घटेच्छायाघ

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११२ टगोचरजैयत्नत्वं न कार्य्यतावच्छेदकमीश्वरीयत्नसाधारणत्वादित्यतत्कार्यकारणभावकोटीकृतत्वेनैनैवताहृशजातिसिद्धिः घटपटेच्छादी
नां यत्ननिष्ठकार्यतावच्छेदकपृथग्जातिकल्पने गौरवेण लाघवादेकस्या एवसिद्धेरिति नच घटत्वप्रकारकेच्छात्वेन कार्य्यकारणभावः
घटत्वेन घटान्तरे यत्नप्रसंगात्० नच समानविषयत्वं प्रत्यासत्तिः घटेच्छावत्त्वे नस्यमेनेच्छाविषये घटान्तरे यत्नप्रसंगात्० तस्माद्वैजीपघ
टेच्छात्वेन न कार्य्यकारणभावः नचेदमीश्वरयत्नेस्त्विति न तद्व्यावर्त्तकः जातिविशेषः सिद्ध्यतु० अतो रागजन्यत्वाति यदि चेत्रमात्रेच्छाविषयत
त्पदार्थेच्छात्वेन ताहृशयत्नेन कार्य्यकारणभावः आत्मादिधीसमवायो विषयद्विधीच वि। घोघत्वं प्रत्यासत्तिस्तदा तत्कार्यतावच्छेदककोटी
कृततया ताहृशजातिसिद्धिरिति ध्येयं केचित्तु कदाचिदिदं रजतं कदाचित्तु रौवर्णं रजतमिति प्रवृत्तेरिदं रजतं जायतामितीच्छा इदं रजतमि
तीच्छा इदं रजतमिति प्रवृत्तौ हि हेतुः समवायप्रत्यासत्तिरिति त्वयापि वाच्यं न तु चैत्रीयत्वादि प्रवेशः इति ईश्वरयत्नवारणाय ताहृशजाति राम
सिद्धिरित्याहुः जातीविशेष्यताहृशजन्यतावच्छेदके न हेतुत्वे गौरवादाह० जन्ययत्नत्वेनेति इति केचित्० नच जन्ययत्नत्वं जीवनयो ११२

निर्व्यभिचारिवह्निर्विषयसंचारवत् ० प्राणपंचकसंचारस्येश्वरयत्नादिनोपपत्तौ यत्नांतरे मानाभावात् ० इति बोद्धाधिकारव्याख्यायामधिकं प्रपं
चितं इति ० इष्टतावच्छेदकप्रकारकत्वमेव तत्र नान्यदिति न दोष इति कश्चित् ० तन्न प्रवृत्तिरिति तथा चेष्टतावच्छेदकप्रकारकप्रवृत्तौ तोपद्धेत
त्प्रकारकज्ञानजन्यत्वं साध्यं अन्यत्र अन्यादृशज्ञानजन्यत्वमिति इष्टतावच्छेदप्रकारप्रवृत्तित्वादिकं विशिष्यैव हेतुरिति प्रवृत्तिहेतुविधेयनिक
श्चितसमवायेन रजतत्वप्रकारिकाकाचित्ताद्रा न न येन रजतप्रकारिकेति प्रवृत्तिहेतुविधेयं प्रवृत्तिहेतुविध्यापलापे त्तु भवविरोध इति तादृ
शानुभवे विप्रतिपत्ते प्रतिगौरवमाह रजतार्थिन इति ० रजतांशे रजतत्वप्रकारकरजतप्रकारकं ज्ञानं तादृशप्रवृत्तौ हेतुरिति गौरव
मित्यर्थः नच त्वयापीदमिष्यत एवेति तुल्यं मया प्रवृत्तिहेतुविध्यानुपपत्त्या तस्याभ्युपगमात् लाघवादिष्टप्रकारकं ज्ञानं कारणं इत्यस्या
प्यनुपपत्तेरिति ० नन्विदं जादेरिष्टतावच्छेदकस्पष्टत्वादेव रूपेणोष्टे । पविमानेदंडीति च्छापत्तेरिष्टांशेऽन्यप्रकारकज्ञानसत्वादत आह तत्र वा
तिप्रसंगाइति तथा च तत्र दंडीमानिनि इच्छाया दंडीमानिनि त्याकारज्ञानजन्यत्वमत्र तु रजतमित्याकारज्ञानजन्यत्वे साध्यं प्रकारभेदेन साध्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११२ भेदादिति यद्वा ॰ ननु तथापि त्रमे यवत्वादिति ज्ञानात्प्रवृत्त्यापत्तिरत्र हि रजतज्ञाने प्रमेयं रजते प्रकारो रजतत्वं च प्रमेयं वद्धर्मिज्ञानमत्र
112 चेति रजतत्वांशे विलक्षणप्रकारस्य तत्प्रकारकं हेतुस्तथापि वाच्यं अन्यथाऽदृष्टप्रकारकज्ञानत्वेन तस्मात्तवापि प्रवृत्तिः स्यादिति तादृश
रागजन्यावाजन्यावाऽसिद्धसाधनमिति ज्ञेदं वोध्यं ॰ यत्वं जतत्वयोरननुगमोच्छक्तिविशेष्यकरजतत्वप्रकारकप्रवृत्तौ ॰ शुक्तिविशेष्यक
रजतत्वप्रकारकज्ञानं हेतुरित्येव साध्यं न चेदं रजतज्ञानं प्रसिद्धमिति न च रजतप्रकारकप्रवृत्तौ रजतत्वप्रकारकज्ञानं हेतुः समानविशे
ष्यत्वं च प्रत्यासत्तिरिति शुक्तिविशेष्यकरजतप्रकारप्रवृत्तौ रजतत्वप्रकारकज्ञानजन्यत्वसिद्धावन्यथा व्याप्तिसिद्धिरिति वाच्यं समान
विशेष्यत्वप्रत्यासत्त्या रजतज्ञानप्रवृत्त्योः कार्यकारणभावाभावादन्यथा चैत्रस्य रजतमिति ज्ञाने सति मैत्रस्य रजतमिति ज्ञाने सति मैत्र
स्य प्रवृत्तिप्रसंगात् ॰ न च मं समवायोप्यात्मादिप्रत्यासत्तिरिति मैत्रस्य रजतज्ञानाभावादेव प्रवृत्तिरन्यथा सति रजतज्ञाने मत्तो मैत्रस्य चैत्र राम
ज्ञानविषये रजते प्रवृत्तिप्रसंगात् ॰ इदं रजतमिति ज्ञाने सत्येव चैत्रस्य तत्रैव प्रकारान्तरेण रजतत्वप्रकारकप्रवृत्त्यापात्ताच्च ॰ तस्मादिदं रज ११२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तमितिप्रवृत्तोऽइदं रजतमितिज्ञानं हेतुः समवायश्च प्रत्यासत्तिरितितच्च हेतुत्वं रजतस्थलेऽन्यसंसर्गस्थले ऽप्रसिद्धा नतोऽयथा कार्य्यकार
णाभावग्रहितात्समानप्रवृत्तिरेवोच्यते यत्र रजतरंगद्वयत्वीदंत्वादिना रूपेण रजतत्वप्रकारकप्रवृत्तितत्र ताद्दशेदंत्वविशिष्टरजतत्वावे
च्छिष्टरजतत्वविशिष्टज्ञानत्वेन ताद्दशप्रवृत्तौ हेतुत्वस्य रजतमादाय कल्पने रंगेऽपि ताद्दशप्रवृत्तौ ताद्दशमिदं रजतमिति ज्ञानं सिध्य
ति॰ तदेव भ्रमग्रहितात्पर्यं नवसामान्यतो रजतत्वप्रकारकज्ञानत्वेन ताद्दशप्रवृत्तित्वेनैव कार्य्यकारणभावग्रहिरजतस्मरणेनैव॰सि
द्धसाधनं विशिष्यचतत्तत्प्रवृत्तित्वावच्छिन्नं तत्तज्ज्ञानव्यक्तिः कारणमित्येव वाच्यमिति॰ कान्यथाख्यातिरिति वाच्यं कदाचिदिदं रजतं क
दाचिद्रजतं वर्त्ति रजतमिति प्रवृत्तिनियम एतत्तद्धर्मितावच्छेदकप्रकारकज्ञाने हेतुतां विनानुपपत्तेरिति साधनविशेषापितत्वं साधना
नुपाधितावीजं आर्द्रेंधनजवह्न्यादे रुपाधित्वात् किंतु साध्यव्यापकता [redacted] ग्राहकाभावादित रोवक्तव्यग्रहितं॰ यत्र च मड ऌप्र
कारएव समर्त्तव्यो ऽयथारंगविशिष्यकरजतप्रकारकज्ञानाप्रसिद्ध्या तथा हेतुता कल्पनादसंगतिर्वीधाभ्यासाद्व्याव्यापकतयेति॰ हेतोः
CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११३ साध्याव्याप्यत्वेन चेतितद्व्यापकत्वान्नोपाधिः साध्यव्यापक इति साक्षादिति अन्यथा रजतत्वप्रकारत्वानुपादानेपि पक्षतावच्छेदकावच्छे
113 देन साध्यसिद्धेर्वेष्टसिद्धेरिति यद्यपि भेदाभेदोदासीनशुक्तिविषयरजतज्ञाने भवेत् नेष्टसिद्धिरिति पूर्वोक्तदोषोत्रापि तथापि शुक्तिवि
शेष्यकत्वावच्छिन्नप्रकारतावत्त्वमेव साध्यं ईश्वरज्ञाने तादृशशुक्तित्वादिप्रकारकत्वादेव न दोषो जन्यत्वं वा देयमिति तादृशरजत
त्वप्रकारकत्वावच्छेदेन वा शुक्तिविशेष्यकत्वं कस्य साध्यमिति न तु ॰प्रयोजकत्वं कार्यप्रागभावप्रतियोगित्वं तच्च भ्रमविशेष्यरजतस्मरणे
ऽपीति व्यभिचारोऽतोऽवच्छेदकेति तथा च कुलालपितृवारिकायाजकं प्रतीत्यन्यथासिद्धेरत्र सत्त्वान्न व्यभिचार इति पक्षेपि जनकपदं प्रयोजक
परं बोध्यं अन्यथा व्याप्तिसिद्धेरिति ज्ञानविशेष इति ॰विशेषपदं जातीव्यक्तीइति समूहालंबनवारणाय विशेषश्च घट इत्याद्याकारकविलक्षणप्र
कारकत्वेन च घटपटाविति ज्ञाने पटांशे घटत्वप्रकारकत्वापत्तिः घट इत्याकारविशिष्टज्ञानस्यहीदं लक्षणं तादृशविशिष्टज्ञानत्वं च घटत्वमा राम
मादायाप्येव ॰तत्तद्व्यक्तिविशिष्टज्ञानस्य लक्षणान्तरमेवदंडपुरुषसंयोगादिति ज्ञानेन कुत्राप्ययं दंडविशिष्टज्ञानत्वं इति ततस्स ११३

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धारणाविशिष्टज्ञानलक्षणमिदमितितन्न व्यभिचार इति अगृहीतासंसर्गकतादृशज्ञानत्वेन विशिष्टज्ञानत्वे साधनेन व्यभिचार इत्यर्थः तद्धि वक्ष्य
णे धर्मधर्मिभावविषयत्वपदेन वैशिष्ट्यविषयत्वविलक्षणेऽसिद्धिराश्रयासिद्धिः वक्ष्यते घट इति ज्ञानस्यानेदं लक्षणं जातिव्यक्तीचेतिज्ञानाति
व्याप्यनात् । न च धर्मांशे धर्मान्तराविषयकधर्मधर्मिविषयत्वं लक्षणं जातिमान् घट इति व्यापनात् । धर्मांशे इत्यस्य निरुक्तस्व अगृहीता
संसर्गस्यैव यथार्थत्वं । अयं घटेनेति ज्ञानस्यापि घटांशे घटत्वप्रकारकत्वादयं घट इति ज्ञानस्य लक्षणत्वे ऽयं च घट इति समूहालम्बनसा
धारणापादतिव्याप्तेः तस्मात्स्वरूपसंबंधविशेषप्रकारत्वं स्वरूपता जातिविशिष्टलौकिकप्रत्यक्षस्य जातिव्यक्तिविषयकलौकिकप्रत्यक्ष
त्वं लक्षणमित्याशयेनेदं इत्यन्ये संबंधान्तरं चेति भावाभासतां संबंध अथापि प्रकारकत्वात्स्वरूपसंबंधरूपादतिरिक्तादेवासमूहालंब
न व्यावृत्तिः संभवति संसर्गाभानेपि तस्यैव धारणीकरणीत्वादित्यपि इष्टत्वं सिद्धादिति अस्पर्शो हिमवलाहित्यादि रजतत्वे न व्यक्तिविषयत्वा
यां साध्यव्यापकत्वादाह पक्ष धर्मेति अप्ययेनैव साध्याव्यापकत्वस्थल स्वयंपूरयन्नाह । रजतारजतेति न च भेदाग्रहस्य कारणतायामिष्टेप

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११५ स्थितेरवच्छेदकत्वस्य तेरूपगमात् तत्र प्रवृत्तिजनकत्वमेव नास्तीति कथं साध्याव्यापकत्वमतो रजतारजतेति तथा चैतस्य ज्ञानस्य धर्मिज्ञानतया ता
दृशप्रवृत्तिहेतुत्वमस्तीति भावः इति केचित् भ्रमस्यातामिषिक्तं ज्ञानं यदि दोषजन्यं तत्राह मूलेऽन्यथेति। तादृशं रजतेच्छा भ्रान्तिगोचरप्रवृत्तिज
नकं इष्टतावच्छेदकेति तेन रंगे नात्र रजतत्वं दंडि निनात्र देइ इति ज्ञानेपि न रजतेच्छा प्रवृत्त्यादिः न च तदानीं रजतस्य स्वतंत्रोपस्थित्यभावादि
वनप्रवृत्तिः रजते नात्र रजतं भ्रमे यामिति ज्ञानदशायां तत्संभवादिति नेदं रजतमिति एवं रजतं नतु रौप्य इति भ्रमस्यापि ज्ञानद्वयतया तत्र भे
दाग्रहसत्वेन शुरोवर्तिन्यपि स्वतंत्रोपस्थितत्ववाध्यमिति न च रजते इदं रजतत्वाभाववत्वादिति भ्रमस्यासंसर्गग्रहतया रजतत्वाभावत्वाविषयत्वे
न स्वतंत्ररजतोपस्थितिसत्वे प्रवृत्तिः स्यादिति वाच्यं तत्रापि रजतत्वाभावज्ञानकालीनरजतत्वाभावासंसर्गाग्रहस्य प्रतिबंधकतया तदभा
वस्य कारणतायावाद्यत्वात्। अभिचानत्तादृशाभ्रमदशायां रजतत्वाभावासंसर्गग्रह इति न प्रवृत्तिः ननु प्रथमं रजतस्मरणं ततो रजतभे एम
दः इति ज्ञानं ततो रजतभेदवदिति ज्ञानं तथा च न स्वतंत्रस्मरणमतस्थलान्तरमहारजतस्य रारिति अत्र च स्वातंत्र्य अभावनिरूपितविषो ११५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

षत्ता[illegible]तिरिक्तविषयतावत्त्वमेव यद्वा समूहालम्बनपूर्वोत्पन्नस्य रजतमिति ग्रहस्य समूहालम्बनकालेऽपि सत्त्वमित्याशयेनेदमिति
भावः नन्वरंगे रजतभेदग्रहपूर्वं रजतत्वस्य स्मरणरूपसत्त्वेनोपस्थितिसत्त्वाद्वा ग्रहस्य च स्वाभावाद्रंगे रजतभेदग्रहकाले प्रवृत्तिः स्याद
तः कारणं चेति भेदाग्रह इत्यर्थः कार्यसहवर्त्तित्वेन कारणत्वमित्यस्यानत्वं प्रागेव प्रपंचितमिति नेह प्रपञ्च्यत इत्याधिकमिति रंगे इदं रजतं
तन्न रजतमिति ग्रहकाले प्रवृत्त्युत्पादः तत्र रजतस्य भेदविशेषत्वादित्यफरिकं विवेचयिष्यत इत्यर्थः पूर्वमिष्टज्ञानस्यावच्छेदक
त्वं मूलेनोक्तमिदानीमिष्टज्ञानस्य कारणत्वं तत्त्वमिथो विरुद्धमत आह उपस्थितयोरिति। एतेन यत्र तत्र वा भेदविशिष्टज्ञानं हेतुरुक्तता
ताभेदासंसर्गाग्रहस्य हेतुत्वेन एकवाक्ये ज्ञाताद्भेदासंसर्गाग्रहस्य हेतोरभावेऽपि व्यभिचारः सत्तात्पर्यैकवाक्ये व्याप्तस्य मयावा
स्य हेतुत्वोपगमादिति निरासः श्वेतार्थिप्रवृत्त्युपपत्तिः अनुमानाभावेऽपि तथा च यद्वेतार्थिनः प्रवृत्तेर्हेतुः स्यादेव श्वेतार्थिनः प्रवृत्तेः
प्रतिबंधकं तत्र पुरोवर्त्यगृहीतासंसर्गकश्वेतभेदज्ञानमिति तत्सत्त्वे श्वेतार्थिप्रवृत्तिर्न स्याद् श्वेतार्थिप्रवृत्तिश्च स्यात् यदि धर्मत्वेन

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११५ ज्ञानं प्रतिबंधकं श्वेतार्थिप्रवृत्तौ च जनकं तस्मादिति भावः तदापत्तिः पीतार्थिनोऽश्वेतार्थिनो वा प्रवृत्तेरापत्तिः तादृशापत्तिरिति राजकृतेऽथे
115 ति चाह्लपपीतभेदसत्वेऽपि इति अप्रामाण्यज्ञानानास्कंदितशुक्तित्वेषः यद्यपि पृष्ठलेन त्वपीतः शंखइत्यनेनैतत्समधीलमेवोक्तं तथापि तत्र श्वेत
भ्रश्वेतभेदविशिष्टज्ञानं प्रतिबंधकं न संभवति अन्यथाख्यातेरभावदत्र वृक्षसत्वे तत्पीतभेदविशिष्टज्ञानसंभवः इत्येतदुक्तं परमते
ज्ञाने भ्रमत्वज्ञानेऽन्यथाख्यात्यापत्तिरतो भ्रमत्वग्रहोपीति न्यायनये नाह संसर्गज्ञानं वेति॰ तथा च ज्ञानवत्यं गृहीतासंसर्गस्य भ्रमत्वस्य ज्ञा
नहद्यत्वस्य वाग्रजज्ञानं भ्रमत्वविशिष्टज्ञाने वा तदभावविशिष्टाभेदग्रहः प्रतिबंधकः अभेदग्रहः कारणमिति ज्ञानवृत्ति नीत्यस्य भ्रम
त्वेनेत्यस्य स्वार्थान्तरेणेत्यस्य च यथाक्रमं व्याख्यात्तिमाह॰ तेनेत्यपीदि तिना तज्ज्ञानस्य पीतत्वाभाववज्ज्ञानस्य पीतत्वादीत्यादिना श्वेतभेदपरि
ग्रहः कथमेवं कथमिष्टभेदाविषयकत्वं विरोधादिति पीतत्वाभावनिश्चयस्य मध्ये इति भावः एवं पीतत्वनिरूपितव्याप्तिपक्षधर्मताज्ञा राम
नाभावात्पीतत्वस्य नाष्टमितौ विषयताइति सप्रत्ययपइति मूलेन भेदप्रत्ययपरामर्शेऽसंगतिरत आह॰ तदनंतरभावीति विरोधादिति पूर्व ११५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

वत् अतएव अभेदभ्रमहेतुदोषस्य भेदग्रहविरोधित्वादिव अन्यथा आनुमानिकभेदज्ञानस्य दोषविघटकत्वाभेदग्रहप्रतिबंधकत्वे आह यती
तितथा च प्रत्यय इति पूर्वं यथाश्रुतमेव केचिदित्यस्वरसस्तु याहीत्यत्राह कार्यार्थकल्पितैवेजन्मांतरेति यद्यपि जन्मांतरेपि कथमनुभवस्म
रणं च सन्निकर्षादिदृष्टादेरेव इह जन्मनि कोपरायत्वात् तथापि पूर्वजन्मन्यपि जन्मांतरीयसंस्कारादेव तथाज्ञानं एवं पूर्वपूर्वमपि प्रामाणिकी चेयमनव
स्थानं च तथाप्यनुभूतस्य तत्संगतं पूर्वजन्मन्यपि स्मरणास्यैव संभवादिति वाच्यं अनुभूतस्य ज्ञानस्यैतितदर्थात् । केचित्तु तादृशसंस्कारस्य
तत्पाजन्मांतरे तदनुभवसंभवात् • न च तर्हि न विशिष्टज्ञानसामान्यत्वेजन्यं जन्मांतरीयस्यैवाखेन्नात इति वाच्यं तत्रापि जन्मनि संस्कारस्या
स्वधात् ज्ञातानुभवध्वंसत्वविशिष्टस्य चज्ञानेन तत्विद्रजतं इत्यनुभव इत्यनुभव इत्यत्र तात्पर्यात् इत्याहुः ऐहिकविशिष्टज्ञानत्वेज
नेतात्पर्यमिति काश्चित् ० उद्बोधकाभावादित्युपलक्षणं जन्मांतरेप्यनुभवात्तप[illegible]पत्तिरित्यपि द्रष्टव्यं अत्र दृष्टमेवोद्बोधकमस्त्विति आश
ङ्क्याविति न तु भवसामग्रीकल्पने गौरवाद् उद्बोधकं कल्प्यते ॰ अन्यथा दृष्टसाधनत्वस्यापनुभावविकासामग्री कल्प्यतातत आह अपूर्वेति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

116 जन्मांतरेपि तस्यानुभवेन स्मरणानुपपत्तेर्नच प्रमेयत्वादिना सामान्यतो जन्मांतरेऽनुभवात्तदंशेउद्बोधकाभावादेव दत्तस्येव स्मरणमिति वा
च्यंताहशस्मरणस्य तत्तदुद्बोधकस्य कल्पने गौरवादन्वयव्यतिरेकशालिनः इंद्रियसंयोगादेः कारणत्वेन तत्तद्दशाविशिष्टज्ञानस्य उत्पन्नत्वाच्च ०
धारावाहिकस्मरणानुपपत्तेः धारावाहिकरजतज्ञानं न स्यादित्यपि कश्चित् ० प्रमात्मकप्रत्यक्षसामग्रीसंभवत्पि ताहशसामग्रीप्रतिबंधान्न
स्मरणोत्पाद इत्याह तच्चेति नवेत्यर्थः स्मृतनयेग्रहस्मरणात्मकस्यैकस्य ज्ञानस्य संभवेपि तदंशे प्रत्यक्षसामग्री तदंशे स्मृतिप्रतिबंधिकेव
प्रवृत्ते च रजतत्वादिप्रत्यक्षसामग्र्याः सत्वान्न तस्मृतिरिति भावः नन्वेतावता भेदाभेदाविषयीतो दासित्येन सम्बध्नाले वन सिद्धावपि न त
त्प्रकारकत्वसिद्धिरत आह तस्य चेति तस्य ग्रहणस्य इदं रजतत्वेन जानामित्यनुव्यवसाये भ्रमस्थलेऽप्यसिद्धीत्यतो वर्धबलादिति न च ताहशा
नुव्यवसायोपि ज्ञानद्वयात्मकः सन्निकर्षासंभवरूपबाधकबलादित्यर्थः दिग्गिर्थं कसाधकविरहादन्वयव्यतिरेकाभ्यामिंद्रियसंनिकर्षादे राम
व प्रमात्मकप्रत्यक्षमिति एवं रजतत्वप्रकारकत्वस्य अनुव्यवसायसिद्धौ गतारोपस्याप्यसंभवः येन च प्रमाणेनान्यत्र सिद्धं तेनैवा प्रतिबाधके ११६

११६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

प्रमायामपीत्याहुः ननु प्रत्यभिज्ञानस्थलेपि संस्कारस्य तत्तादिविषयत्वादिंद्रियस्येदंत्वादिविषयत्वादिदमसंगतमतो भिन्नविशेषणविष
त्वादिति तथा च तद्विशेष्यसंस्कारस्य तद्विशेषणकप्रत्यक्षे प्रत्यासत्तित्वे प्रत्यभिज्ञाने त्वेकमेव विशेष्ये इदंत्वरंगरजतत्वयोर्भेदादेनैक्यमि
ति एवं संस्कारेंद्रिययोर्मिथ एकविशेष्यकमात्रकार्य्यजनने ऽनुभवादिति एतत्तत्कालीनत्वं प्रकारो वाऽप्रामाण्यघटकः संबंधो वा उभयथापि तेन
रूपेणानुभवान्न स्मरणमिति सामग्र्यभावादिति एतत्कालसंबंधस्य लौकिकप्रत्यक्षाविषयत्वात् तज्ज्ञाने प्रत्यासत्तिताघटकस्य रजतमात्र० नभाना
मिति असंसर्गाग्रहस्यापि तदप्रामाण्ये एतत्कालसंबंधस्येति भावः तथा निष्कंपप्रवृत्तिनिवृत्तिजनकं सकंपत्वात् निःकंपत्वे प्रवृत्तिनिष्ठाविषय
ताविशेषे जातिविशेषाविन्यापि केतर० विरोधीति० विरोधसंबंधेनैकधर्मिणि नानाप्रकारकेत्यर्थः यत्र स्थाणुरिति लौकिकं ज्ञानं ततो
लौकिकं नवस्थाणुरिति ततः स्थाणुत्वतदभावयोरेकं स्मरणं द्वोत्पत्तिस्थितिक्षणयोः पूर्वोत्पन्नासंसर्गाग्रहयोरभावे विशिष्टं तद्धारणायै
कदेति भेदाग्रहविशेषणं यत्र स्थाणुत्वस्मरणोत्तरं स्थाणुत्वाभावस्मरणं तत्र स्थाणुत्वस्मरणकाले भेदाग्रहसत्त्वाऽउपस्थितारेकदेति न

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११७ 117 वोपस्थितावेकदेतिविशेषणेयत्रप्रथमंस्थाणुत्वमात्रस्यततस्थाणुत्वाभावधर्मिणीत्येकं स्मरणं तत्र द्वितीयज्ञानेसंशयत्वं न स्यात्तत्रद्वि
तीयस्मरणेपिस्थाणुत्वविषयत्वोपगमादन्यथासंशयत्वाभावस्येष्टत्वादितिस्थाणुत्वोपस्थितिविशिष्टस्थाणुत्वाभावोपस्थितिर्भेदाग्र
हश्चयाविशिष्टासंशयः साचतदाप्यस्तीत्ययुक्तः। अतिप्रसंगः संशयव्यवहारापादनं अतइति एकधर्मिणि द्वयोरसंसर्गाग्रहः संशयः
समुदायालंबनज्ञभिन्नभिन्नधर्मिणोर्वासंसर्गाग्रहइत्यर्थः नातइतिभेदाग्रहस्यैवसंशयत्वात्भेदाग्रहेसंशयइत्यनुपपत्तिरित्यर्थः संश
यपदप्रतिपाद्यंज्ञानमेवेत्याशयेनाहधर्मिज्ञानमितितथाचसतिसप्तमीएकधर्मिणिद्वतेत्रोपस्थितविरुद्धज्ञानेभेदाग्रहेसतिधर्मिज्ञा
नंसंशयइत्यर्थः नचेति भेदाग्रहे सति कोटिद्वयस्मरणं धर्मिज्ञानं चात्र यो: संशयहेतुरित्युच्यते मयातु सएव संशय इति तदभा
वेनवापिसंशयोनचस्यादित्यर्थः यद्वा क्रमिकविपर्ययकालेत्वन्मतसंशयसामग्र्यभावात्मन्मते संशयस्याभावो अन्यथामन्म राम
तसिद्धसंशयापादनेत्वन्मतेसंशयसामग्रीसत्वात्तन्मतेसंशयस्यादिति अन्यथेतिफलार्थइतिभावः क्रमिककोटिस्मृति ११७

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

धर्मिज्ञानानां एकदा असत्त्वेनतथापि तत्रसंशयहेतुतानंगीकारात् इतिसंशयात्तत्रस्थलइतियत्रविनापिसंशयंलिंगंश्रमा
न्यायनयेअनुमितिमत्रेत्यर्थः असंसृष्टतंत्रवह्निस्मरणासत्तथापस्थिते। निवह्नित्वव्याप्यवत्तत्रोपस्थितिःसंभवादितिनशुक्ति
रियत्रभेदत्वेनैवोपस्थितिःनतुशुक्तिभेदासंसर्गाग्रहत्वेनेतिभावः अनुपयोगात् अकारणत्वात् तथाचेष्टांशेस्वतंत्र्योभा
वान्नप्रवृत्तिःततएवचाप्रवृत्त्युपपत्तौतदुपपत्तयेनतत्ररजतभेदविशिष्टबुद्धिरितियदिरजतभेदाग्रहःप्रवर्त्तकःतदारजते
नेदंरजतमितिभ्रमेपिप्रवृत्त्यापत्तिरन्यथाख्यातिभयेनतत्रभेदग्रहस्वीकाराद्द्वादिभेदग्रहमन्दान्यथाख्यातिरित्यप्यतएवनेत्यतएववा
दिसंमताशयत्तथावातएवानिष्टभेदाग्रहस्यातिवर्त्तकत्वादेवेतिमूलार्थः तथा चानिष्टत्तिप्रयोजकोयोऽनिष्टस्यरजतभेदस्यासंसर्गा
ग्रहस्तदभावप्रवृत्तिहेतुरितियदेवेवतीतितथाचरंगत्वभ्रमहेतुदोषस्यैवरजतत्वेनगोरैवप्रवृत्तिप्रतिबंधकत्वंरंगगोचरानिष्टत्तिहे
तुत्वमितिमूलार्थः अनुपजातविरोधितया। अनुपजातत्वविषयविरोधिविषयकत्वानततया। तद्विरुद्धत्वेनतद्विषयविरुद्धत्वेन

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११८ 118 तद्विषयविरुद्धत्वेनानुपस्थित्याऽस्वविषयविरोधिविषयोपस्थित्यात् तद्विरुद्धत्वेन तद्विषयविरुद्धत्वेन बाध्येऽपीति कश्चिद्बाधे
ऽपि परस्मिन्नविरुद्धार्थकत्वेनानुव्यवसीयमानत्वरूपं विरुद्धार्थग्राहकत्वमस्तीति तादृशमेव न बाधकमिति भावः यद्यपि वस्तु
गत्या बाध्योऽपि महदृशायामप्रामाण्यज्ञापकत्वलक्षणं बाधकत्वमस्ति तथापि विरुद्धतयार्थग्राहकत्वेऽप्रामाण्यप्रमापकत्वद्वारा
त्वं नास्तीति बाध्यानल्पमित्यनेन दर्शितं तात्पर्यस्य बाधत्वे द्वितीयबाध्यताद्युत्पादनेन हि विरुद्धत्वेनार्थग्राहकस्य बाध्यत्वमिति
न व्यवस्थितेरिति भावः आकारित्यपररुचिबीजं तत्र भयत्र पंचमीप्रयोगापत्तिः द्वयोरेव हेतुत्वात् यद्वा एतत्पक्षे पसरेत्यादिनै
वहृषितत्वात् विरुद्धार्थेत्यादिस्थलानुत्थानादत्रारुचिः परत्वेनैव बाधकत्वमतित्वच्छेन शंका स्यादमतः कश्चिदित्यनेनारुचि
सूचिता अन्यथाभानं प्रतीत्यापराहतमिति तथाच्छ्रुतमसंगतमतः प्रतीतिस्वाभाव्यादिति प्रतीतित्वस्य भ्रमत्वाभावे व्याप्यता । राम
दित्यर्थः एतद्व्याप्तिग्राहके सहमावारमाह यस्मिन्नित्यादिविवादपदं भिन्ने ज्ञाने सर्वत्र भ्रमत्वाभावदर्शनादिति तदर्थः यदि रूप ११८

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

स्पर्शादिनिष्ठमेवोद्भूतत्वं तदाह जन्यस्पर्शेति प्रमाप्रमात्मकसमूहालंबनवृत्तिनिप्रमात्वे दृष्टांते साध्यवत्त्वं नोभयवादिसंमतं अत आ
ह सर्वांशेति सर्वांशप्रमात्वं सर्वांशप्रमामात्रवृत्तिधर्मः वा धर्मव्यभिचारादिति अजनितज्ञानं चक्षुर्व्यक्तो बाधस्तत्राह घ्राणेंद्रियांतरे चे
ड्रियत्वहेतोः व्यभिचार इति ज्ञानकारणेति ० आत्मादौ साध्यसत्त्वेन तत्र द्वारकस्य स्वस्वजन्यजनकेत्यादिविशेषणस्य वैयर्थ्यादिति भावः
लाघवादाह ज्ञानकारणेति ० सर्वत्र स्वस्वरूपयोग्यत्वघटितसाध्यसत्त्वान्न व्यभिचारः हेतावेव फलोपधानं वाच्यं इति काचित्तत
त्र चाक्षुषप्रमामात्रफलोपधायके व्यभिचारात् सर्वांश इति सर्वांशे सत्यातिरिक्तो भ्रमाभवत्येवेति तज्ज्ञानकत्वमादाय वसा
ध्यसत्त्वमिति हेत्व सामानाधिकरण्येत्यादि व्याप्तो व्यापके व्यर्थविशेषणत्वं न दोषाय अतोऽप्रयोजकमिति दिगर्थः स्व भ्रमकारण
त्वोपपत्तिः ज्ञानप्रत्यासत्त्यादेः परैरनभ्युपगमादिति ननु अप्रमाण्यज्ञानानास्कंदितं ज्ञानद्वयं प्रवर्तकं अप्रामाण्यज्ञानं वागृही
तभेदज्ञानद्वयत्वज्ञानं तथा च ज्ञानयोः स्वरूपतो भेदग्रहेपि अगृहीतत्वस्य ज्ञानादगृहीतभेदज्ञानद्वयत्वज्ञानानास्कंदितमप्री

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

जितदापिप्रवृत्तिःस्यादित्यतआह अत्रचेतिएवंघ्नतंत्रोपस्थितप्रकारेप्रकृतज्ञानविशेष्यावृत्तित्वासंसर्गाग्रहस्यरजतत्वाभाववतिप्रकृत
ज्ञानविशेष्यत्वासंसर्गाग्रहस्याप्यभावोबोध्यःज्ञानस्येति॰एकंज्ञानंसंवादिप्रवृत्तिजनकंज्ञानद्वयंविसंवादिप्रवृत्तिजनकंइतिनयत्र
वाष्पववह्निमजिघ्नमभ्रमात्घ्वतंत्रोपस्थितवह्न्यसंसर्गाग्रहस्तत्र वह्निस्मृतिभेदोवर्त्तिज्ञानरूपज्ञानद्वयादपिसंवादिप्रवृत्तेःएवंधात्वा
भासेपिज्ञानद्वयस्यात्वयव्यभिचारइतिकश्चित्॰एकद्वयेणनेवोभयघटितकल्पदोषइत्यन्येअत्रचेष्टतावच्छेदकप्रकारकंप्रत्यक्षंत
त्राप्यसिद्धिउपादानप्रत्यक्षस्यप्रवृत्तिहेतुत्वादेकंज्ञानंसंभवादिप्रवृत्तौहेतुरितिनानुपपन्नमितिकेचित् यत्रास्रजतेकदापि
नरजतत्वासंसर्गाग्रहस्तत्राप्यतत्ताभावसत्त्वादभ्यासादपिसं-वादिप्रवृत्तिःस्यादतआह छेकेतिअसंसर्गाग्रहप्रतियोगिविषयासंसर्गस्यत्य
र्थःतथाचविद्यमानरजतत्वासंसर्गस्याग्रहोविसंवादिप्रवृत्तौ विद्यमानस्यतथाग्रहःसंवादिप्रवृत्तौहेतुरित्यर्थःप्रागभावादीका एम
रादाह॰तद्घटकेतीतिकेचित्॰केचिदित्यस्यविवीजंतु स्फुरतीत्यस्वैयथ्यमेवनतुयत्रनानापदार्थस्मरणाजन्माप्राग्बोधस्तत्रैवात्रेय ११९

मस्थले तादृशस्मरणस्य भ्रमत्वापत्तिर गृहीतासंसर्गधर्मधर्मिगोचरज्ञानस्य विशिष्टज्ञानत्वादत आह गृहीतेति॰ प्रकारत्वं च स्वरूपसं
बंधविशेषेतिरिक्तं वा स्मृतरजतास्मरणादीनां नारजते रजतत्वप्रकारकत्वमित्यर्थः स्मरणामित्युपलक्षणं ज्ञानांतरमपि दृष्टध्वं
स्तत्वः शक्त्यापातनं तत्र मते संभवतीति प्राटिमात्रे तत्रानेकस्मरणापगमेपि समूहालंबनप्रत्याज्ञानिरासाज्ञाधवेनैकस्यैव स्मरणस्य कल्प
नादिति॰ पूर्वोक्तमेव साधुएवं प्राभाकरमीमांसकमते निर्वाणिति दूषणांतरमभिधीयत इत्यर्थः साक्ष्यस्य स्वतंत्रोपस्थितिः रजतएवेतिरज
तभेदस्य न पुरोवर्तिनीति पुरोवर्तिप्रवृत्तिभेदाविशेषाणात्वमस्मेवेत्यर्थः पुरोवर्तिगृहीतेतिरजतएव नेदं रजतमित्यत्र च पुरोवर्त्य
गृहीतासंसर्गरजतभेदप्रतियोगित्वज्ञानविषयत्वं रजतेऽस्त्येवेति न प्रवृत्तिः अत्रैव तादृशभेदाग्रहस्य पुरोवर्ति ज्ञानं च प्रवर्त
कमिति वक्तव्यो भेदाग्रहपदार्थत्वेनेति शेषः तर्हीति शुक्ताविदं रजतमिति भ्रमे पुरोवर्त्यगृहीतासंसर्गो रजतभेदप्रतियोगि
त्वेन रजतस्योपस्थितेः प्रवृत्तिर्न स्यादितिरजतभेदासंसर्गस्य रजतत्वस्य पुरोवर्तिनि ग्रहे चाव्याप्तिरिति भावः एतेन शुक्ता

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

120 विदं रजतं तन्न रजतमित्यत्राप्रवृत्तिप्रसंगेन तत्र हि पुरोवर्त्तिव्यक्तिनिष्ठरजतभेदे ज्ञायमानरजतप्रतियोगित्वस्यासंसर्गाग्रह एवास्ती
ति न प्रवृत्तिः स्यादिति तथा प्रवृत्तिहेत्विदं रजतमिति भ्रमस्थले पुरोवर्त्तिनिष्ठरजतभेदे रजतप्रतियोगित्वाभावाग्रहसत्त्वास्तीति प्र
वृत्तिर्न स्यादतो ज्ञायमानेतीत्यर्थः तदा च रजतप्रतियोगित्वाज्ञानात् ज्ञायमानरजतप्रतियोगित्वासंसर्गाग्रहो नास्तीत्यर्थः न
च पुरोवर्त्तिनिष्ठेत्यस्य पुरोवर्त्तिनित्वात इत्यर्थो दोषाद्वृत्तदानतदेद ग्रह इत्यर्थः किं चेति तिति केचित्तन्न अतिप्रसक्तमित्यनेनो
क्तवक्ष्यमाणदोषादसंगतेः इदं रजतमिति भ्रमात्प्रवृत्तिर्न स्यात्कदाचिज्ज्ञायमानरजतप्रतियोगिकत्वासंसर्गाग्रहस्य रंगनिष्ठभेदे स
ति त्वादित्येवांप्रसंगार्थः नच पुरोवर्त्तिनि ज्ञायमाने भेदे तदा तदसंसर्गाग्रहः दोषेण रजतभेदाग्रहात् उपदर्शितस्थले इदं रजतमिति
ज्ञानमात्रात्प्रवृत्तिस्थले रजते एव नेदमिति रजते च रजतभिन्नत्वप्रकारकज्ञानविशेष्यत्वस्वीकारे चान्यथाख्यातिप्रसंग इति भावः राम
अतिप्रसंगादिति उक्ता विदं न रजतमिति ज्ञानदशायां रजतादौ रजतभिन्नत्वप्रकारकज्ञानविशेष्यत्वाभावसत्त्वात् प्रवृत्तिः स्यादितिः

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

रजतारजते नितथाच सर्वत्र रजतभिन्नत्वज्ञान विशेष्यत्वाभाव ग्रहदानीमिन्त्र रजतत्व एव तदभावात् थाच प्रवृत्तिर्नस्यादिति नच पुरोवर्तिनि
रजेगृहीतासंसर्गक एवतदारजतभेद इति अगृहीतासंसर्गकरजतभिन्नत्वज्ञाने विषयत्वाभावो मेवेति वाच्यं रंगेइदं रजतं शुक्तो नर
जतं इति ज्ञानदशायां रंगे प्रवृत्त्यभावापत्तेः तत्र रंगे रजतभेद संसर्गग्रहे अन्यथाख्यातापत्तेः यद्वा यत्रैक रजतेऽन्यरजतत्वारोपस्त
भिप्रायेणेदं तथाच रजत शुक्तेऽपि मे तद्रजता तद्रजते इति ज्ञानात्प्रवृत्तिर्नस्यादित्यर्थः दिगयं [illegible] ष्टतावच्छेदकाभावस्यापि ग्रहा
तं ज्ञानि स्तक्ति रिति केचित्० अन्ये तु इदं बोध्यं पुरोवर्तिनिष्टभेदे ज्ञायमानरजत प्रतियोगित्वा संसर्गाग्रहाभाव एव हेतुर्नच शुक्ताविदं र
जतं तन्नरजतमित्यत्र प्रवृत्तिर्नस्यान्निष्टेइत्यस्य ज्ञानमात्रे इत्यस्यार्थकत्वात् दोषाभावात् तदानीं शुक्तो नरजतभेद ज्ञानमिति सर्वमतसि
द्धमेव० किंतु पुरोवर्तिनि ज्ञायमानभेदत्वावच्छेदेन रजतप्रतियोगित्वासंसर्गाग्रहाभावो बोध्यस्तेन रंगे इदं न रजतं रंगत्वाद्घटभेद
वन्न रजत प्रतियोगिक इति ज्ञानदशायां घटभेदे रजतप्रतियोगित्वासंसर्गाग्रहाभावसत्वेपि न प्रवृत्तिः नच यदि पुरोवर्तिनि ज्ञाते भे

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

११६ देत्यर्थः तदातत्र भेदाज्ञाने इदं रजतमिति ग्राह्यज्ञाना त्प्रवृत्तिर्नस्यादिष्टापत्तेः रूपादानप्रत्यक्षस्य प्रवर्त्तकत्वेन तत्र कस्यचिद्भेदस्य भानसंभवादिति यद
121 पि यदा कदाचित् ज्ञानमानत्वमतिप्रसक्तमित्युक्तं तदपि न रजतप्रतियोगित्वासंसर्गाग्रहस्याभावः कारणमित्युक्तत्वात् ० वैशिष्ट्यं चैकका
लिएकात्मवृत्तित्वमिति यदि त्वपुरोवर्त्तिवृत्ति भेदज्ञानरजतप्रतियोगित्वज्ञानोभयविशिष्ट रजतप्रतियोगित्वासंसर्गाग्रहस्याभावः का
रणमुच्यते तदापुरोवर्त्तिभेदाज्ञानेपि इदं रजतमिति ग्राह्याद्दितः प्रवृत्तेर्नानुपपत्तिरंशेपि न च यत्रोपस्थितं रजतप्रतियोगित्वं पुरो
वर्त्तिनि ज्ञाते भेदेनारोपितं किंतु रजतभेदस्योपस्थितस्य पुरोवर्त्तिन्यारोप स्तत्र प्रवृत्तिः स्यात् ज्ञायमानरजतप्रतियोगित्वासंसर्गाग्रहा
भावादिति वाच्यं इष्टभिन्नत्वज्ञानकालीनेष्टभेदासंसर्गाग्रहस्यापि प्रतिबंधकत्व तयातदभावस्यापि कारणत्वात् ० उक्तस्थले च पस्थित
रजतभेदासंसर्गाग्रहस्यैव सत्वादिति न च शुक्तौ इदं रजतं नेदं रजतमित्यत्र प्रवृत्तिर्नस्यात् इदं रजतभेदासंसर्गस्य रजतत्वस्य ग्रहेऽन्यथाख्या राम
तिभयेन रजतभेदासंसर्गाग्रहसत्वादिति वाच्यं दोषहेतुकरजतभेदासंसर्गाग्रहस्याभावस्य हेतुत्वात् न च शुक्तौ दोषहेतुकोरजतभेद

१११

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

संसर्गस्य रजतत्वस्याग्रहः किंतु तत्र रजतत्वस्याग्रहः किंतु तत्र रजतत्वाभावत्वनिवेधन एव न च शुक्तौ नेदं रजतमिति ज्ञानेपि प्रवृत्तिः
स्यात्तदानीमपि दोषहेतुक रजतभेदासंसर्गाग्रहस्याभावादिति वाच्यं रजतत्वभ्रमजनकदोष रजतपुरोवर्त्त्युपस्थितीनां त्रितयवकि
न्नाभस्य विशिष्टोपस्थित रजतभेदासंसर्गाग्रहस्याभावः कारणमित्युक्तत्वात् शुक्ताविदं रजतं इति ग्रहस्थले च रजतभेदासंसर्गाग्र
हसत्वेपि दोषाभावविशिष्टस्य तस्यासत्वाद्दोषस्य सत्वादिति केचित्तु दोषहेतुकतादृशासंसर्गग्रहाभाव एव हेतुश्चेदं रजतमिति
भ्रमेपि दोषहेतुकतादृशासंसर्गग्रहाभावसत्वादिष्टभिन्नत्वज्ञानकालिनेति ध्येयं मिष्टत्वात्तथापि ह्यातं व्यस्य निरुक्तेः न च पूर्वो
क्तशुक्तौ नेदं रजतमिति ज्ञानेपि प्रवृत्तिः शुक्तौ रजतत्वप्रकारकप्रवृत्तौ नेदं रजतमिति ज्ञानाभावस्य पृथगेव कारणत्वादित्या
ऽऽः रजते रजतत्वप्रवृत्तौ रजतत्वविशिष्टज्ञानं हेतुः रजते तथा प्रवृत्तौ रजतभेदाग्रहः पुरोवर्त्तिन्यस्यैकस्याभावात् घाद्दान्तगमस्य
किंचित्करत्वादित्यन्ये परे तु रजतत्वविशिष्टज्ञानाभावो रजतभेदज्ञानाभावो दोषहेतुक रजतभेदाग्रहस्योऽभावो दोषहेतुकर

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२२ 122

जतत्वांसंसर्गाग्रहस्ययोभयेप्येतेषांचतत्त्वावछिन्नाभावः प्रवृत्तिमात्रेहेतुरित्याहुः अन्येतुरजतत्वग्रहप्रतिबंधकदोषाभावोरजतभि
न्नमितिविशिष्टज्ञानाभावश्चेदंद्वयंचकावत्स्वातंत्र्येणरजतत्वप्रकारकप्रवृत्तिसामान्येहेतुः अतोनोक्तदोषइत्याहुः इत्थंचयद्यपि
स्वातंत्र्यनिरुक्तिः संभवतितथापिज्ञानद्वयमात्रेष्टभेदाग्रहेऽगृहीतभेदकमिष्टज्ञानंवह्निरित्यादिवक्ष्यमाणविनिगमाविरहेता
त्पर्यंइष्टत्वेनपुरोवर्त्तिज्ञानत्वेनव्यवस्थितेतत्रैववैशिष्ट्यविषयकत्वमवच्छेदकंकल्प्यतइतिमूलमसंगतमतआहायमर्थइति
अतिप्रसंगेनेत्यादिज्ञानत्वस्यरजतप्रवृत्तिजनकतावच्छेदकत्वेघटज्ञानादपिरजतप्रवृत्तिप्रसंगः पुरोवर्त्तिज्ञानत्वेष्टज्ञानत्वयो
रवच्छेदकत्वेकार्यकारणभावद्वयकल्पनागौरवंरजतपुरोवर्त्तिनीतिसमूहालंबनसाधारणंरजतपुरोवर्त्तिविषयकज्ञानत्वे
नकारणत्वेनद्व्यात्वेनरजतपुरोवर्त्तिविषयकज्ञानात् इदंरजतयोरजतपुरोवर्त्तिनीइतिसमूहालंबनाद्रजतत्वप्रकारकप्रवृत्तिप्र एम
संगः तवज्ञानद्वयात्क्वापिप्रवृत्तिप्रसंगः कस्याप्युभयाविषयत्वादित्यर्थः प्रमेयत्वेनसंबंधत्वादिनावातदुभयवैशिष्ट्यावगाहिज्ञान १२२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

रं॰ प्रवृत्तिप्रसंगोऽत आह॥ प्रकारकेति ज्ञानत्वादिनावेति अपेक्ष्यमानत्वं तत्रोपस्थितपुरोवर्त्तिभेदकेष्टज्ञानत्वमादिनाज्ञानस्याह
त्वेति प्रथमेवाधकं गौरवादिति सर्वत्र अत एवेष्टज्ञानत्वेन पुरोवर्त्तिज्ञानत्वे नेष्टपुरोवर्त्तिभेदाग्रहत्वेन च कारणत्वं पृथक् कृप्
प्य गौरवं न तत्किमपि ज्ञापि अवच्छेदकं इत्यपास्तं अनेककार्यकारणभावकल्पनेपि गौरवाच्च न च तथापीदं रजतमत्र रजतत्वमि
मिदं रजतत्ववदिति ज्ञानानां हेतुत्वे गौरवात् इतरेदं न रजतं नात्र रजतमिदं नेदं रजतत्ववदिति समूहालंबनविरोधिज्ञानत्वेन हेतुत्वात्ला
घवादिदं रजतमिति ज्ञानस्येव वा प्रवर्त्तकत्वादिति परेषामपि नेदं रजतं नात्र रजतं रजतत्वाभाववदिदं इत्यादिज्ञानानां प्रवृत्ति
प्रतिवंधकत्वकल्पनामपि लाघवेन नेदं रजतमित्येव ज्ञानं प्रतिवंधकमित्यप्याहुः न च वपकत्वलाघवं भेदाग्रहेप्यतस्मि
दानिमिति तदानिष्टज्ञानप्रवृत्त्योः कार्यकारणभावकल्पनकाले तादृश्येणताहृशभेदग्रहत्व यदा स्वपस्थिति तदावश्यकत्वे भे
दाग्रहेपि हेतुत्वं कल्प्यमानत्वे नितिरस्तत्वादिति अघकेयमित्यादिना निरस्तत्वादित्यर्थः इदं रमापातत पूर्वोक्तरीत्या प्रातं तस्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२२ 123 निरुक्तेऽगौरवादिदोषस्यैवसाधुत्वादिति यदीष्टज्ञानत्वेनैव कारणत्वं व्यवस्थितं तदा कथं तत्रावच्छेदकांतरकल्पनाऽगौरवाद्यवस्थाप्यमान
इति न त्वं तु व्यवसायेन रजतत्ववैशिष्ट्यग्रहे स्वतः प्रामाण्यग्रहापत्तिरतो यथा चेति तथोपपादितमिति तद्विशेष्यकत्वावच्छिन्न
तत्प्रकारकत्वं प्रामाण्यं न चेदं वैशिष्ट्यगोचरतायामेव विषयी भवतीत्यादि परनये यदि विशिष्टज्ञानं प्रति भेदाग्रहस्य कारणता
तदा तस्यावश्यकत्वेन च स्तासे भवति प्रमात्मके विशिष्टज्ञाने न द्वेष्टत्वे मानाभावात् भ्रमात्मकस्य परनयेऽसिद्धेः न च न्यायनयेऽन्या(
वश्यकत्वं तस्येति वाच्यं तदानीं भ्रमस्यासिद्धेः आवश्यकत्वलाघवस्य भेदाग्रहेऽग्रहादित्याह स्यभेदाग्रहेऽग्रहादित्याह सत्यस्थ
ल इत्यादिना मानाभाव इति तादृशज्ञानविषयत्वाभावस्य सर्वदासत्वेन तद्विलंबेन कार्यविलंबाभावान्न स हेतुरित्यर्थः ननु भ्रम
स्थले तादृशाभेदग्रहप्रसिद्ध्या तदभावः कारणमस्त्वत आह सत्यस्थले इति ॰ तादृशज्ञानस्य फलीभूतविशिष्टज्ञानस्य कस्यहे राम
तुत्वं के प्रति हेतुत्वं भेदाग्रहस्येत्यर्थः यामिकजागरणभेदाग्रहस्य प्रवृत्तौ कारणत्वात्तु स्मरणं ननु रजते नेदं रजतमिति ज्ञानकाले १२२

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

नरजतत्वविशिष्टज्ञानमिति सर्वसिद्धांतवतव मते रजतभेदविशिष्टज्ञानात्मन्मतेतत्सामग्रीतः साचोपस्थितरजतभेदासंस
र्गाग्रहश्चितिमएव प्रतिबंधकत्वदभावोविशिष्टज्ञानेतद्धेतोरिति न्यायात्प्रवृत्तौ चहेतुः एतेनात्रतद्धेतोरिति न्यायस्यावसरएव
नास्मिन्द्वातेत्र्यप्रगर्भभेदाग्रहस्यविशिष्टज्ञाने हेतुतापाः कुत्रापिअकल्पनादितिनिरस्तंअत्र यथानुपपत्त्या तत्प्रतिबंधकत्व
कल्पनात्॥ नच घटोनरजतमिति ज्ञानकाले चक्षुःसंयोगेनरजते रजतत्वविशिष्टधीर्नस्यादुपस्थितरजतभेदासंसर्गाग्रहस्य
सत्वादिति वाच्यं दोषहेतुक रजतभेदासंसर्गाग्रहस्य प्रतिबंधकत्वादुक्तस्थले पूर्वं रजतभेदासंसर्गस्य रजतत्वस्याग्रहोऽसन्निकर्षा
न्नतुदोषादितिचेन्न॥ विवक्षितंविवेकेन ताद्दृशदोषाणामेव विशिष्टज्ञानविरोधित्वं तथा चतत्तद्दोषाभावानांकारणत्व कल्पनेगौ
रवं एवं प्रवृत्तावपि व्यधिकरणप्रकारकप्रवृत्तौ दोषाणांकारणत्वमिति काश्चित्तन्न। गौरवात् व्यभिचाराच्च धर्मसाधारणास्ज
तत्वप्रकारकप्रवृत्तौ तत्तदसंसर्गाग्रहाणांमेकशक्तिमत्वेनहेतुत्वं॥ व्यधिकरणप्रकारकप्रवृत्तावेव वातत्तद्दोषाणांमेकशक्ति

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२४ 124 सत्वेन हेतुत्व मित्यपि केचित्‌ । अत्र च यत्र रंगरजत वृत्तीदंत्वादिप्रकारेण रजतत्वप्रकारकप्रवृत्तिस्तत्रेदंत्वधर्मितावच्छेदकरजतत्वविशि
ष्टज्ञानत्वेन तादृशेदंत्वविशिष्टरजतत्वप्रकारकप्रवृत्तौ हेतुत्वं पूर्वोक्तं बोध्यं अन्यथा अरजते रजतत्वप्रकारकप्रवृत्तौ रजतभेदग्रहस्य
प्रसिद्धस्याभावो हेतुः रजते रजतत्वप्रकारकप्रवृत्तौ रजतेतरत्वविशिष्टज्ञानं हेतुरित्यफलितौ न कोषः स्यादित्यपि ध्येयं वस्तुतस्त्वात्मादपि
ष्यत इति वस्तुत्वादिति चानुमानदीधितावेतादृशसंकायाः प्रतिबंधकत्वे प्राथम्याः सामान्यकार्यकारणभावविलोपप्रसंगादिति अ
न्यथातादृशासंकायाः कारणतायहविरोधित्वे बाधितात्वयबोधविरोधइति अयोग्यताज्ञानाभावस्य शाब्दधी हेतुत्व अयोग्यता
ज्ञानाभावस्य दशायां वह्निना सिंचतीत्यत्रापि शाब्दधीः स्यादिति सिद्धे देवान्यथाख्यातिरतो योग्यताज्ञानत्वेन कारणतकल्प
नायां च तादृशगौरवसंभावनाया न प्रतिबंधत्वमिति धीकार्यमिति संदिह्यमानस्यापि कारणत्वादेवत्राणकादीधिकार्यस्यत्र स राम
णवादेः गंधकारणगंधे प्रमाणांतरवत्तदासाद्यद्यवयवगंधत्वेनावयविगंधत्वेन कार्यकारणभावस्तत्तज्जातीयगंधे तत्तज्जायीयगं १२४

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

घस्य वा हेतुतास्यात्तस्या अपि तदा कल्पनं स्यात् ० यदि गौरवमिति ० संदेहात विरोधी अन्यथावयवसंयोगध्वंसस्यावयविनाशहेतुत्वे तत्तदवयवसंयोगध्वंसक
ल्पने गौरवमिति ० सर्वभावेन संभवेन तत्कल्पनेव न स्यादिति न वा भेदाग्रहात्प्रवृत्त्युपपत्तिरपीत्याह सामग्रीति द्वावेतेन तस्य निर्विकल्पमशक्य
त्वात् ० ननूक्तदिशाद्यतेन च यद्यत्र निर्वचनमपि शक्यं किं च तदाग्रहे ऽन्यथासिद्धत्वमात्रं कल्पनीयं तस्य पूर्ववर्त्तितायाः सर्वसिद्धत्वात्तत्र
तु विशिष्टज्ञाने नियमान्यथासिद्धत्वमात्रं कल्पनीयं तस्य पूर्ववर्त्तितायाः सर्वसिद्धत्वात्तत्र विशिष्टज्ञाने नियमान्यथासिद्धी कल्प
नीये अत आह ० पुरोवर्त्तिनीत्यादि ० रजतस्थले रजतभेदग्रहस्याभावः कारणं न तु रजतत्वाभावग्रहस्य रजतत्वघटितत्वेन तस्य गुरुत्वा
दतः क्वचिदिति दंडादिस्थले दंडाभावग्रहाभावो हेतुरित्यर्थः ० क्वचिदिति अत्रापि पूर्ववत्पारेति ० व्यापारकल्पनं हि अन्वयव्यतिरेका
भ्यां शब्दादिना वा कारणत्वेऽवगते तत्र नियतपूर्ववर्त्तित्वरक्षणाय यथा दंडघटस्थले भ्रमेर्यागस्वर्गयोरपूर्वस्य च कल्पनं प्रकृते चोपदर्शि
तानां भेदाग्रहाणां कारणत्वे गौरवं विशिष्टज्ञानस्य तथात्वे लाघवमिति ज्ञानदशायां तु भेदाग्रहे कारणत्वकल्पनं तु तत्र ज्ञानय

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

व्यापारकल्पनमितिभावः नवादैभेदाग्रहस्यविशिष्टज्ञानेव्यापारः आत्ममानिकश्वेतभेदग्रहे सत्येवनयनेन श्वैत्यविशिष्टज्ञानात्प्रवृत्ते
रित्याह नहीत्यादितथा चनवापिभेदाग्रहस्यपूर्ववर्त्तित्वेन सर्वत्रासिद्धमित्यपिवोध्यं अतिप्रसंगात्सामान्यकार्य्यकारणभावस्यवहुषुवि
लोपप्रसंगात्॰ पंक्ताद्यौलिंगादीति आदिपदात्पक्षवृत्तिलिंगेव्याप्यत्वासंसर्गाग्रहे व्याप्येचपक्षवृत्तित्वासंसर्गाग्रहोवोध्य इति यद्वा आ
दिपदाद्योग्यतासंसर्गाग्रहस्यायोग्यताज्ञानाभावरूपस्यग्रहः अग्नेचाम्रमित्यादिकमित्यादिपदाच्छाब्दवोधस्येति शाब्दस्थलेपीति
नचयत्रभक्तविनष्टजलाभिप्रायेणपयसासिंचतीत्युक्तंतत्रावयप्रयोजकरूपवत्त्वस्यपयस्त्वस्ययोग्यतात्वे तद्विशिष्टज्ञानसत्त्वात्
शाब्दवोधः स्यादितिवाच्यंतेषांमते यथार्थतात्पर्य्यकत्वज्ञानस्यशाब्दवोधेहेतुतयाप्रकृतेतद्विशिष्टज्ञानाभावादेव शाब्दवोधाभावादितिन
चैवंयोग्यतालिंगादिभ्रमाद्वाधितस्थलेशाब्दवोधादिर्नस्यादिष्टापत्तेःफलस्यानिर्णयेन तत्पक्षादोषात्तथाहेतुत्वाकल्पनात्॰ अत्ररं
गरजतत्वप्रकारप्रवृत्तेः सर्वसंमततयापलापितुमशक्यत्वेनशरीरपिभेदाग्रहस्यकारणत्वमास्थीयते नवज्ञानद्वयासत्त्वेव रंगेरज

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

तमानंतैर्तीनप्रत्यासत्यनेगीकाराल्लाघवेन रजतत्वादेः प्रत्यक्षे चाक्षुषे चाक्षेन्द्रियस्य च त्वाचे वा संयुक्तसमवायः कारणमिति तेरूपगा
मात्वइति कारणं वाधं निराकरोति अपिवित्यादिना रजतत्वसंनिकर्षस्य सत्वेन यथा रजते रजतत्वविशिष्टधीस्तथा रंगेपि स्याद्बाधकाभा
वादिति एवं रजतत्वस्य संयोगादीसंवंधेन रंगते विशिष्टज्ञानस्यादित्यपि वोध्यं विशेषरूपेणेति प्राचिनोमते न त्वाज्ञतत्वविशेषस्येति नव्यमं
मतं अपमर्थस्तत्कालिन चैत्रोजीवनमरणान्यतरप्रतियोगिप्रागभावाद यत्काले चैत्रे जीवनमरणान्यतरवान् चैत्रजीवनप्रागभाववद
न्यकालत्वादित्यादौ मृते चैत्रे लाघवसहकाराज्जीवनप्रतियोगित्वं तं यत्रभासतेन्यथाप्त्यातिसिद्धिरिति न च कल्पतये ऽन्यतरत्वेनव
क्तगत्या जीवनस्य भानेपि न धर्मत्वं तदवच्छिन्नाभाववत्तितदवच्छिन्नप्रकारकसैव धर्मतादिति वाच्यं तदभाववत्तितत्प्रकारकत्वसैव धर्
मत्वात् अन्यथा प्रकारकवच्छेदकभेदेन धर्मत्वभेदे गौरवात् लाघवेन तदभाववति तत्प्रकारकस्यैव तथात्वात् वाधानवतारे जीवनप्र
तियोगित्वस्येति शेषः देशकालेत्पत्तिकालीनो घटे गंधात्यन्तावच्छिन्नो हत्त्वः संयोगी गंधाद्याप्यवत्ताज्ञानाउत्पत्तिकालाद्यव

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१३६ छिन्नसमवायेन घ्राणतागंधाद्यनुमितिः स्यादेवकारणत्वादिति कश्चिदित्यस्वरसः क्लृप्तजनतावच्छेदकावच्छिन्नसंबंधेनसाध्यानुमितेरमानाभा
वः येनसंबंधेन व्याप्यकताज्ञानं तेनैवानुमितेरन्यथातिप्रसंगात् २० इत्येवउत्पत्तिकालावच्छिन्नसमवायेनगंधाद्यनुमितेरप्रमितेः २१ प्रसिद्धेन्न
न्नन्यथाकारणत्वमेवनक्लृप्तमितिकथं भ्रमोत्पत्तिरित्यपाकृतः अत्र वदंति रंगे रजतसंनिकर्षे रंगे रजतत्वस्यानुभूयमानारोपाः १८ नु
पपत्तिरापादकाभावात् संनिकर्षस्य रजतत्वप्रत्यक्षत्वेकार्यतावच्छेदकं न च रजतत्वांशे भ्रमादावेवोपपन्ने ऽत्र रजते रजतत्वप्रकारकेज्ञा
नमापाद्यमप्रसिद्धं न च विशेषणज्ञानान्तत्रापि विशिष्टबुद्धिः तन्मते विशेषणज्ञानस्याहेतुत्वात्तत्वेवा रजतांशे भ्रमादस्यैवता
दुत्पादं दादन्यथाघटत्वनिर्विकल्पकोत्तरं घटत्वांशे घटविशिष्टज्ञानापत्तेर्न च तत्रादृष्टविशेषः प्रतिबंधकं प्रतिबंध्यस्य घटत्ववि
शेष्यकघटज्ञानस्याप्रसिद्धेः प्रसिद्धौ वा न प्रतिबंध्यत्वं तस्माद्विशेषणज्ञानाद्विशिष्टज्ञानमितिसत्येन तु सर्वधर्मिणीतरदिति अकृत्वा एम
विशेषणज्ञानस्यतत्त्वहेतुर्धर्मिविशेष्यकविशिष्टज्ञाने हेतुता अत एव न घटत्वे घटविशिष्टधीर्निर्विकल्पकोत्तरमितिवक्तृतो रजतत्वसंनिक १३६

126

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

र्षस्य रजतत्वप्रत्यक्षप्रमात्वं कार्य्यतावच्छेदकं अन्यथा सर्वत्रैव रजतत्वविशिष्टप्रत्यक्षस्यानियामकाभावादिति परे मते न न रंगे रजतत्व
विशिष्टप्रत्यक्षमिति तन्न रंगे रजतत्वविशिष्टज्ञानकारणाभावादेवाहितस्य प्रवृत्त्यर्थकारणत्वं संभावितं विपरीतचक्षुष्कस्थले च संनि
कर्षस्वरूपतत्कार[illegible]ण प्रदर्शितेन विशिष्टज्ञानस्य प्रवृत्तिहेतुतायाः विशिष्टज्ञानस्य च निराबाधत्वमुपपादनात् ० रजतत्वप्रत्यक्षत्व
स्यैव लाघवेन संनिकर्षकार्य्यतावच्छेदकत्वान्न तत्प्रमात्वस्य तथा च कारणबाधेन रंगे प्रवृत्तिरूपफलमेव विशिष्टज्ञानसाधकमिति
न च विपरीतचक्षुष्कातिरिक्तभ्रमस्थले भेदाग्रहस्य प्रवृत्तिहेतुत्वे क्लृप्ते प्रकृतप्रवृत्तिरपि न विशिष्टज्ञाने प्रमाणमिति वाच्यं लाघवेन विशि
ष्टज्ञानस्य प्रवृत्तिहेतुत्वे क्लृप्तेऽयत्र ज्ञानादिप्रासक्तिकल्पनाया एवौचित्यात् ० यत्र विपरीतचक्षुष्कस्थल एव प्रवृत्तिस्तत्रैवान्यथाख्यातिक
ल्पितः ० समानप्रकारकत्वेन पदार्थस्मरणशाब्दबोधयोः कार्य्यकारणभावाद्ध्वंसगंधवदित्यादौ ध्वंसे जलेपि गंधवत्त्वभानं स्यान्न च यथार्थ
तात्पर्य्यग्रहकारणं च जलमादाय यथार्थप्रतीतिपरत्वमस्तीति वाच्यं एवं सति कार्य्यतानिरूपणां पूर्वं न बोधे तत्फलितस्मृतिबोधविषयापूर्वव्य

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१२७ 127

न्तेः पूर्वमज्ञाने न तत्स्मृतीति घटितं यथार्थज्ञानपर्य्यकत्वाज्ज्ञानात् तस्माद्यथा तत्र घटादौ योगविषयत्वबाधाद्दूर्व कार्य्यसिद्धिरिति तथा पृथिव्यां
गंधवत्वबाधे इष्टत्वेन पूर्वानुपस्थितमले जलं भासतामित्यन्यथाख्यातिसिद्धिः एवमिदं न रजतमिति ज्ञानेपि धर्मितावच्छेदकांतरेणा
ज्ञातपत्तेर्न भेदाग्रहस्य हेतुत्वं न च तद्धर्मितावच्छेदकवति भेदाग्रहस्य तद्धर्मितावच्छेदकविशिष्टज्ञानहेतुत्वमन्यथापि धर्मितावच्छेदकानियं
त्रिता रजतं जायते रजतं जायतामिति ह्याधिकरणप्रकारिकज्ञानस्यादित एवमन्येंद्रियजन्यभेदवत्ताज्ञानेपि तदिंद्रियेण भेदभ्रमा
तप्रवृत्तेर्न भेदाग्रहः प्रवृत्तौ हेतुरिति न च तदिंद्रियजप्रवर्त्तिज्ञानजप्रवृत्तौ तदिंद्रियजभेदग्रहाभावो हेतुर्वैपरीत्यस्यापि विनि
गमनाविरहेन संभवेऽन्योन्याश्रयादिति भावनीयं केचित्तु वासनैव विपरीतः संस्कारस्य च भ्रमजन्यत्वमेवेत्यन्यथाख्यातिसि
द्धिः न च ज्ञानद्वयस्यैवादृष्टहेतुत्वं निद्रादशायां गंगाजलसंयोगादिनादृष्टानुत्पत्त्यापत्तेर्न च ज्ञानद्वयेन विपरीतवासनाजन्यते तत् राम
थासति तस्या विपरीतस्मृतिजनकत्वापत्तेरित्याहुः सा वासना नानास्मृतिजननी ४३ दृष्टहेतुः सा च ४३ उद्बोधकासमवधानादि १२७

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

त्यन्येव कृतो ग्योऽप्यत्वनिश्चयाभाव एव शाब्दबोधे हेतुर्न तु योग्यताधीरिति व्युत्पादयिष्यते तथा चायोग्यतानिश्चयाभावदशायां
वह्निना सिंचतीत्यादौ शाब्दबोधानिरोध इति ध्येयं व्यावर्त्तकधर्मेति स्वमते रंगत्वस्य व्यावर्त्तकस्य रजते ग्रहात् प्रमायामुक्तत्वादौ र
गे च तस्याग्रहात् भ्रमेऽस्योत्पाद इति प्रदर्शनायेत्यर्थः तथा च व्यावर्त्तकधर्माग्रहस्य प्रतिबंधकत्वदर्शनार्थमेव विपरीतचाक्षुषयो
पादानमित्यर्थः एवमपि यदा एकत्र रजते रजतमिति अन्यत्र रजते अरजतमिति ग्रहस्तदा रजतत्वेन रजतत्वारजतत्वेन ज्ञातेऽपि रजता
र्थिनः प्रवृत्तिस्याद्रजतभेदाग्रहस्य तत्रापि सत्वात् यद्यपि रजते नेदं रजतमिति ज्ञानात् प्रवृत्तिःस्यादित्येव दूषणार्थः पर्यवसितः तथापि
भेदांविशेषणत्वान्यरजतविषयताशालिज्ञानांशे हेतुत्वोक्तौ न तत्प्रतीकारसंभवति इह तु रजते रजतमिति ज्ञानस्य तादृशास्य सत्वाद
रजतत्वेन भ्रमविषयेऽपि रजते प्रवृत्तिःस्यादित्यर्थः क्वचिद् रजतरजतयोरिमे रजतारजते इति तत्र रंगत्वाद्यविषयकतया विपरी
तचाक्षुषभिन्नेऽपि दोषो भवतीत्याशयः तादृशादोषस्येति तादृशदोषहेतुकरजतभेदासंसर्गाग्रहस्य वा रजतत्वप्रकारकप्रवृत्तेः

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१६८ 128 विरोधित्वमित्यपि द्रष्टव्यं यद्वानाह यद्दोषहेतुकेति तदपेक्षया लाघवेन दोषस्यैव तथात्वमित्याशयेनेदं लौकिकभ्रमस्थलेऽउक्तं ताह यादो
षः प्रतिबंधको वक्ष्यते न शाब्द इत्याह नचेति ताह यावद्भ्रमो लैंगिकभ्रमः लिंगासंसर्गाग्रहहेतुरिति यदि च वह्न्यादेः संनिकर्षाद्यभावविशि
ष्टलिंगासंसर्गाग्रहस्य दोषत्वं तदा नायं दोषः किंतु विशिष्टज्ञानहेतुतायां भेदाग्रहस्य चाहेतुतायां पूर्वोक्तयुक्तिः स्मर्तव्या ए
वं किंचिदस्मीति शब्दस्यत्रापि किंचित्वेन घटत्वादिना भाने व्यावर्तकधर्मस्यैव ग्रहोऽयदाविष्टापत्तिः अतः पूर्वोक्ततात्पर्यमाह
किंचिदस्मीत्यादौ न ध्यानं समाधिमाह न ध्याने क्षितिन केवलं प्रकृतिनिष्ठस्यारे वाकोज्ञायायाः प्रयोगः किंतु आमाएपत्तरेपीति प्रपं
चयति यथातिरेकादित्यादिना प्रयोजनांतरमाह शतरविशेषणेति प्रतियोजनांतरमाह एकत्वेति व्यवहितः श्रुतिपदप्रतिसंधा स्म
नमाहत्तिः समीपश्रुतपदप्रतिसंधानमप्रसंगः क्वचिद्धानित्या प्रयोजनांतरमाह एकत्वेति व्यवहितस्य दोगोत्वसंगतरवि १६८

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

पोषणत्वेनविशेषणज्ञानामनन्वयादिति॰प्रत्यक्षे सहकारितामाह अतएवेत्यादिषु नावह्निसमानाधिकरणधर्मवानिति परामर्षस्यैकदेशो
त्कीर्तनं तथा च प्रत्यक्षात्मकपरामर्षस्य न पर्वतो वह्निविशिष्टज्ञानत्वमित्यर्थः तथा च व्याप्तिज्ञानेव ह्निविषयकेपि न पर्वतानिरूपिता
कांक्षा किंतु परामर्षएवेतितयापेयं अन्यथा परामर्शएव वह्निमत्वभानेगतमनुमानप्रामाण्यं न अस्माकंतु उपनयात्स्वीकारात्पराम
र्शेन पर्वतो वह्निविशिष्टबुद्धित्वमिति भावः अस्माकमाकांक्षावादिनां रंगे रजतरंगोभयभेदाग्रहे संशयत्वं रंगाभेदाग्रहेऽन्यथा
ख्यातित्वमिति इदं इदं धर्मि तिद्धर्मितावच्छेदकरजतत्वप्रकारकबोधजनकतावच्छेदिकाकांक्षात्र विशेषणज्ञानेन
तीति भावः इष्टत्वादिति न च परामर्ष एव साध्यवत्वग्रहेनुमानवैयर्थ्यं यत्र स्मरणात्मकात्पक्षात्मकाद्वा परामर्शादनुमितिस्तत्रे
वतस्य प्रमाजनकत्वात् । केचित्तु परामर्शमादाय न शंका किंतु वह्निसमानाधिकरणवानिति ज्ञानोत्तरं कश्चिदुपनीतभानं स्यादि
त्यवशेकात्तत्रेष्टापत्तिरुत्तरमित्याहुः तद्धि हे वाधग्रहे तेनैव वाधेनैव शक्तराविशेषणत्वेनेति यद्यपि दंडिअरुषेदंउं इदं घमि॰

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

१४५ 129 तिसमूहालंबनाद्दंडवद्गृहमितिविशिष्टप्रत्ते:दंडज्ञानापत्ति: तथापि एतद्गृह भिन्नानिष्टविशेषणानिरूपितविशेषणता त्वदंडविषयता
शालिज्ञानं दंडवानितिबुद्धौ हेतु: न च संसर्गविषयादंडज्ञानात्तदापत्ति: दंडविशिष्टबुद्धौ विशेषापत्ते: दंडत्वविशिष्टवैशिष्ट्यबोध
स्यनजायते । तत्कारस्य दंड इति ज्ञानस्याभावात् । यद्यपि दंडव्याप्यवदिति ज्ञानाद्व्याप्यांशे दंडविशेषणकाद्दंडवदित्यनुमिति स्तथा
पि दंडवदितिप्रत्यक्षादौ विशिष्टहेतुत्वाबोधात्तत्र तत्रेति गृहं दंडवत्पुरुषोदंडीत्यादौ गृहेतरादिगर्भतादृशदंड ज्ञानज्ञानत्वे
नहेतुत्वमित्यर्थ: घटाद्यंशव्यापिविशेष्यकादंडादेरूपस्थितिर्दंडवानितिविशिष्टवैप्रत्यक्षादौकारणं तत्तद्विशेष्यत्वे च न तत्तज्ज्ञाना
विशेषणत्वे सति तज्ज्ञानविशेष्यत्वे दंडीपुरुषो दंडोऽद्रव्यमित्यत्राव्याप्ते: किंतु स्वरूपसंबंधविशेष: प्रकारत्वादिति दिक्‌ । वस्तुत: अत्र
एववह्निवह्निसमानाधिकरणोऽयमिति समूहालंबनोत्तरं वह्निमान्वह्निसमानाधिकरणवानिति कश्चिद्ज्ञानमिति । घटो नास्तीत्यस्य राम
त्तिता नावच्छेदकसाधनज्ञाने नियतग्रहापत्तिरित्यवयमाशिमाह द्यवसायस्येति । स्वभावादिति अत्रापि बाधाग्रह इष्टत्वात्तद्धेतेने १९५

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

130

वप्रतिवंधादित्यपि इष्टत्वं न तस्मात्कोटिज्ञानमेव लाघवात् प्रयोजकं साकाङ्क्षत्वज्ञानप्रयोजकतानामकं तत्त्वग्राहकौ रवाध्यत्वं च यथातवा
पि विशिष्टज्ञानसामग्र्येव प्रवृत्तौ हेतुः स्यादतेपि चेत्ति कारता वाधस्मृति अनुभूयमानारोपस्थले न कारणवा
धः तच तत्र रजतत्व विशिष्टप्रत्यक्षं रजते जायतएव रंगे तदापादकाभावइति वाच्यं इदं रजतत्वेन जाना
मीति प्रत्यक्षेणैव रंगे रजतत्वविशिष्टबुद्धिसिद्धि : कारणवाधादेव हि तत्र ज्ञानद्वयमभ्युपेतं त
न्निरासे च तादृशानुव्यवसायादेव भ्रमसिद्धिरि त्यर्थः॥ ॥छ॥छ॥ ॥इति महामहोपा
ध्यायश्रीविद्यानिवासभट्टाचार्यात्मजश्रीरुद्रभ ट्टाचार्यविरचिता प्रत्यक्षदीधितिपरीक्षा समाप्ता रम
राम पर्व श्रीराम त्यप राम मङ्गल राम
॥छ[redacted] छ॥छ॥छ॥ संवत् १६८७ ॥॥छ॥ श्रीकृष्णसहाय ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥ १३०

CC-0 Dharmartha Trust J&K. An eGangotri Initiative

न्याय

पत्र १ खंडित

श्रीरामायनमोनमः श्लोक [illegible]००



१२६

CC-0 Dharmartha Trust J&K. An eGangotri Initiative